# षोडशः पाठः। स्वागतं तपोधनायाः।

राज्याभिषेकादनन्तरं श्रीरामचन्द्रचरितं यस्मिन् नाटके वर्तते तद् नाट्यम् उत्तररामचरितम्। भवभूतिः नाम महाकविः अस्य नाटकस्य रचयिता। अस्य नाटकस्य द्वितीये अङ्के वर्तते अयं वनदेवता-आत्रेयी-संवादः।

- के अध्ययनप्रत्यूहाः?
- युष्माकम् अध्ययने यदि विघ्नाः आपतन्ति तर्हि यूयं कथं तान् निराकुरुथ?



(नेपथ्ये) स्वागतं तपोधनायाः।

(ततः प्रविशति अध्वगवेषा तापसी)

वनदेवता – आर्ये, का पुनः अत्रभवती? किं प्रयोजनं दण्डकारण्यप्रवेशस्य?

आत्रेयी – अस्मिन् प्रदेशे बहवः अगस्त्यादयः मुनयः निवसन्ति। तेभ्यः वेदान्तविद्याम् अधिगन्तुम् अत्र आगता। वाल्मीकिमहर्षेः आश्रमात् इह आगतास्मि।

वनदेवता – अहो आश्चर्यम्! अन्ये मुनयः वेदान्तज्ञानार्थं वाल्मीकिम् ऋषिम् उपगच्छन्ति। कथम् अत्रभवती तस्य आश्रमात् अत्र अटति?

आत्रेयी – तत्र महान् अध्ययनप्रत्यूहः उत्पन्नः। तस्य भगवतः केनापि देवताविशेषेण दारकद्वयमुपनीतम्। कुशलवौ इति तयोः नामनी। एकादशवर्षाणि यावत् भगवता वाल्मीकिना धात्री इव पोषितौ रक्षितौ च। उपनयनं कृत्वा त्रयीविद्यामपि अध्यापितौ। अतिप्रदीप्तप्रज्ञामेधे तयोः। न अस्मादृशाः सामान्याः छात्राः ताभ्यां सह अध्येतुं शक्नुवन्ति। यतः,

वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे
न खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा।
भवति हि पुनर्भूयान् भेदः फलं प्रति तद्यथा
प्रभवति शुचिर्बिम्बग्राहे मणिर्न मृदां चयः ।।

वनदेवता – अयमध्ययनप्रत्यूहः ?

आत्रेयी– अन्यश्च।

वनदेवता– अथ अपरः कः ?

आत्रेयी– अथैकदा सः महर्षिः माध्यन्दिनसवनाय तमसानदीतीरम् अगच्छत्। तत्र वृक्षे एकं क्रौञ्चयुग्मम् आसीत्। सहसा व्याधेन तयोः एकः बाणेन विद्धः। भूमौ पतितं निश्चेष्टं सहचरं दृष्ट्वा क्रौञ्ची व्यलपत्। तस्याः करुणं विलापं श्रुत्वा अकस्मात् महर्षेः मुखात् अनुष्टुप्छन्दसा अश्रुतपूर्वा दैवी वाणी स्फुरिता 'मा निषाद, प्रतिष्ठां त्वमगमः शाश्वतीः समाः......'

वनदेवता – चित्रम्। आम्नायात् अनन्तरम् नूतनः छन्दसाम् अवतारः।

आत्रेयी– तेन हि पुनः समयेन भगवान् ब्रह्मदेवः तत्र आविर्भूतः 'महर्षे, प्रबुद्धः असि। रचय रामचरितम्'। इति आदेशबद्धः सः वाल्मीकिः रामायणरचनायां मग्नः अस्ति। तस्मात् ब्रवीमि, इदानीं तत्र अध्ययनमसम्भवम्।

वनदेवता – युज्यते।

आत्रेयी – विश्रान्तास्मि भद्रे। सम्प्रति अगस्त्याश्रमस्य मार्गं कथय।

## भाषाभ्यासः

**१. एकवाक्येन उत्तरत।**

(१) आत्रेयी वाल्मीकिमहर्षेः आश्रमात् दण्डकारण्यं किमर्थम् आगता ?

(२) दारकद्वयस्य नामनी के ?

(३) वाल्मीकिः माध्यन्दिनसवनाय कुत्र अगच्छत् ?

(४) क्रौञ्च्याः विलापं श्रुत्वा महर्षेः मुखात् कीदृशी वाणी प्रसृता ?

(५) ब्रह्मदेवः वाल्मीकिं किम् आदिशत् ?

**२. माध्यमभाषया लिखत।**

(१) आत्रेय्याः प्रथमः अध्ययनप्रत्यूहः कः ?

(२) ब्रह्मदेवेन "रचय रामचरितम्" इति वाल्मीकिः किमर्थम् आदिष्टः ?

**३. प्रश्ननिर्माणं कुरुत।**

(१) आत्रेयी वाल्मीकिमहर्षेः आश्रमात् दण्डकारण्यम् आगता।

(२) व्याधेन क्रौञ्चः बाणेन विद्धः।

(३) अन्ये मुनयः वेदान्तज्ञानार्थं वाल्मीकिमृषिम् उपगच्छन्ति।

**४. अ) शब्दस्य वर्णविग्रहं कुरुत।**

(१) अगस्त्यः (२) वाल्मीकिः

(३) अनुष्टुभ् (४) वेदान्तम्

**आ) कालवचनपरिवर्तनं कुरुत।**

(१) मुनयः वनप्रदेशे निवसन्ति। (एकवचने परिवर्तयत।)

(२) रचय रामचरितम्। (लिङ्लकारे परिवर्तयत।)

**इ) विशेषण-विशेष्य-मेलनं कुरुत।**

| विशेष्यम् | विशेषणम् |
|---|---|
| १) सहचरः | १) पोषितौ |
| २) विलापः | २) अश्रुतपूर्वा |
| ३) कुशलवौ | ३) करुणः |
| ४) वाणी | ४) निश्चेष्टः |

# भाषासूत्रम् – ४



## (अ) लृट्लकार: (द्वितीय: भविष्यत्काल:)।

| ह्य: –भूतकाल: | अद्य – वर्तमानकाल: | श्व: – भविष्यत्काल: |
|---|---|---|
| अहम् अपठम्। | अहं पठामि। | अहं **पठिष्यामि**। |
| बालका: अखेलन्। | बालका: खेलन्ति। | बालका: **खेलिष्यन्ति**। |
| माता अयच्छत्। | माता यच्छति। | माता **दास्यति**। |
| त्वम् अनम:। | त्वं नमसि। | त्वं **नंस्यसि**। |
| राम: अमुञ्चत्। | राम: मुञ्चति। | राम: **मोक्ष्यति**। |

**मेलनं कुरुत।**

| रूपाणि | पठिष्यामि | खेलिष्यन्ति | दास्यति | नंस्यति | मोक्ष्यति | गमिष्यति | वक्ष्यति | प्रक्ष्यामि | प्राप्स्यति |
|---|---|---|---|---|---|---|---|---|---|
| धातव: | प्र+आप् | मुच् | गम् | वच् | दा | प्रच्छ् | नम् | खेल् | पठ् |

## लृट्प्रत्यया:। (भविष्यत्कालप्रत्यया:)

| परस्मैपदम् | | | | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
| स्यति | स्यत: | स्यन्ति | प्रथम: | स्यते | स्येते | स्यन्ते |
| स्यसि | स्यथ: | स्यथ | मध्यम: | स्यसे | स्येथे | स्यध्वे |
| स्यामि | स्याव: | स्याम: | उत्तम: | स्ये | स्यावहे | स्यामहे |

| गम् (१ प.प.) | | | | लभ् (१ आ.प.) | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
| गमिष्यति | गमिष्यत: | गमिष्यन्ति | प्रथम: | लप्स्यते | लप्स्येते | लप्स्यन्ते |
| गमिष्यसि | गमिष्यथ: | गमिष्यथ | मध्यम: | लप्स्यसे | लप्स्येथे | लप्स्यध्वे |
| गमिष्यामि | गमिष्याव: | गमिष्याम: | उत्तम: | लप्स्ये | लप्स्यावहे | लप्स्यामहे |

| नृत् (४ प. प.) | | | | मन् (४ आ. प.) | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
| नर्तिष्यति | नर्तिष्यत: | नर्तिष्यन्ति | प्रथम: | मंस्यते | मंस्येते | मंस्यन्ते |
| नर्तिष्यसि | नर्तिष्यथ: | नर्तिष्यथ | मध्यम: | मंस्यसे | मंस्येथे | मंस्यध्वे |
| नर्तिष्यामि | नर्तिष्याव: | नर्तिष्याम: | उत्तम: | मंस्ये | मंस्यावहे | मंस्यामहे |

| प्रच्छ् (६ प. प.) | | | | मुच् (६ आ. प.) | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
| प्रक्ष्यति | प्रक्ष्यत: | प्रक्ष्यन्ति | प्रथम: | मोक्ष्यते | मोक्ष्येते | मोक्ष्यन्ते |
| प्रक्ष्यसि | प्रक्ष्यथ: | प्रक्ष्यथ | मध्यम: | मोक्ष्यसे | मोक्ष्येथे | मोक्ष्यध्वे |
| प्रक्ष्यामि | प्रक्ष्याव: | प्रक्ष्याम: | उत्तम: | मोक्ष्ये | मोक्ष्यावहे | मोक्ष्यामहे |

| चिन्त् (१० प. प.) | | | | गण् (१० आ. प.) | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
| चिन्तयिष्यति | चिन्तयिष्यत: | चिन्तयिष्यन्ति | प्रथम: | गणयिष्यते | गणयिष्येते | गणयिष्यन्ते |
| चिन्तयिष्यसि | चिन्तयिष्यथ: | चिन्तयिष्यथ | मध्यम: | गणयिष्यसे | गणयिष्येथे | गणयिष्यध्वे |
| चिन्तयिष्यामि | चिन्तयिष्याव: | चिन्तयिष्याम: | उत्तम: | गणयिष्ये | गणयिष्यावहे | गणयिष्यामहे: |

**वाक्यानि पठत।**

१. वयं सायंकाले उद्यानं **गमिष्याम:**।
२. मम पुस्तकं मह्यं कदा **दास्यसि** ?
३. बालका: ज्येष्ठान् **नंस्यन्ति**।
४. छात्रा: उत्तमान् अङ्कान् **प्राप्स्यन्ति**।
५. 'सिंह, जृम्भस्व ! दन्तान् ते **गणयिष्यामि**।
६. परश्व: मम मातामही मम गृहम् **आगमिष्यति**।
७. प्रपरश्व: मातुल: द्विचक्रिकां **प्रदास्यति**।
८. आगामिनि वर्षे अस्माकं शालायां सुवर्णमहोत्सव: **सम्पत्स्यते**।
९. अग्रिमे मासे परीक्षा **भविष्यति**।
१०. आगामिनि वर्षे अहं चन्द्रयाने **उपवेक्ष्यामि**।
११. अग्रिमं युगं तन्त्रज्ञानेन एव पूर्णं **भविष्यति**।

**जिज्ञासापत्रम्**



● अस्माकं मित्रम् अग्रिमे मासे कन्याकुमारीं गमिष्यति। स: तत्र किं किं करिष्यति इति चिन्तयित्वा वाक्यानि पूरयत।
१. अद्वैत: अग्रिमे शनिवासरे यात्रारम्भं ____________। (कृ)
२. विमानयानेन स तत्र अन्येद्यु: ____________। (प्र + आप्)
३. प्रथमं कन्याकुमारीस्थितं देवालयं स: ____________। (दृश्–पश्य्)
४. तस्मात् समुद्रतीरं ____________। (या)
५. तत्रस्थं सूर्यास्तम् ____________। (अव + लोक्)

**पठत अवगच्छत !** **व्यञ्जनानां विस्तार:।**

९) तान् + चोरान् = तांश्चोरान् ।
विघ्नान् + च = विघ्नांश्च।

न्+ च/छ/ट/ठ/त/थ् ं (अनुस्वार:), : (विसर्ग:)

बहून् + तस्करान् = बहूंस्तस्करान्।
एतान् + छात्रान् = एतांश्छात्रान्।

१०) परि + छेद: – परिच्छेद:।
तरु + छाया = तरुच्छाया।

ह्रस्व: स्वर: + छ = च्छ

मातृ + छाया = मातृच्छाया।
वि + छेद: = विच्छेद:।

# क्रियापदरूपाणि।


| धातु:(गण:, पदम्) | लट् | लङ् | लोट् | विधिलिङ् | लृट् | कर्मणि |
|---|---|---|---|---|---|---|
| पठ् (१ प.प.) | पठति | अपठत् | पठतु | पठेत् | पठिष्यति | पठ्यते |
| दा (१ प.प.) | यच्छति | अयच्छत् | यच्छतु | यच्छेत् | दास्यति | दीयते |
| पा (१ प.प.) | पिबति | अपिबत् | पिबतु | पिबेत् | पास्यति | पीयते |
| गै (१ प.प.) | गायति | अगायत् | गायतु | गायेत् | गास्यति | गीयते |
| ध्यै (१ प.प.) | ध्यायति | अध्यायत् | ध्यायतु | ध्यायेत् | ध्यास्यति | ध्यायते |
| नी (१ उ.प.) प.प. | नयति | अनयत् | नयतु | नयेत् | नेष्यति | नीयते |
| नी (१ उ.प.) आ.प. | नयते | अनयत | नयताम् | नयेत | नेष्यते | नीयते |
| स्मृ (१ प.प.) | स्मरति | अस्मरत् | स्मरतु | स्मरेत् | स्मरिष्यति | स्मर्यते |
| हृ (१ उ.प.) प.प. | हरति | अहरत् | हरतु | हरेत् | हरिष्यति | ह्रियते |
| हृ (१ उ.प.) आ. प. | हरते | अहरत | हरताम् | हरेत | हरिष्यते | ह्रियते |
| रभ् (१ आ.प.) | रभते | अरभत | रभताम् | रभेत | रप्स्यते | रभ्यते |
| नृत् (४ प.प.) | नृत्यति | अनृत्यत् | नृत्यतु | नृत्येत् | नर्तिष्यति | नृत्यते |
| क्रुध् (४ प.प.) | क्रुध्यति | अक्रुध्यत् | क्रुध्यतु | क्रुध्येत् | क्रोत्स्यति | क्रुध्यते |
| मन् (४ आ.प.) | मन्यते | अमन्यत | मन्यताम् | मन्येत | मंस्यते | मन्यते |
| लिख् (६ प.प.) | लिखति | अलिखत् | लिखतु | लिखेत् | लेखिष्यति | लिख्यते |
| प्रच्छ् (६ प.प.) | पृच्छति | अपृच्छत् | पृच्छतु | पृच्छेत् | प्रक्ष्यति | पृच्छ्यते |
| दिश् (६ उ.प.) प.प. | दिशति | अदिशत् | दिशतु | दिशेत् | देक्ष्यति | दिश्यते |
| दिश् (६ उ.प.) आ.प. | दिशते | अदिशत | दिशताम् | दिशेत | देक्ष्यते | दिश्यते |
| मुच् (६ उ.प.) प.प. | मुञ्चति | अमुञ्चत् | मुञ्चतु | मुञ्चेत् | मोक्ष्यति | मुच्यते |
| मुच् (६ उ.प.)आ.प. | मुञ्चते | अमुञ्चत | मुञ्चताम् | मुञ्चेत | मोक्ष्यते | मुच्यते |
| पूज् (१० उ.प.)प.प. | पूजयति | अपूजयत् | पूजयतु | पूजयेत् | पूजयिष्यति | पूज्यते |
| पूज् (१०उ.प.)आ.प. | पूजयते | अपूजयत | पूजयताम् | पूजयेत | पूजयिष्यते | पूज्यते |
| स्पृह्(१० उ.प.)प.प. | स्पृहयति | अस्पृहयत् | स्पृहयतु | स्पृहयेत् | स्पृहयिष्यति | स्पृह्यते |
| स्पृह्(१०उ.प.)आ.प. | स्पृहयते | अस्पृहयत | स्पृहयताम् | स्पृहयेत | स्पृहयिष्यते | स्पृह्यते |
| चुर् (१० उ.प.) प.प. | चोरयति | अचोरयत् | चोरयतु | चोरयेत् | चोरयिष्यति | चोर्यते |
| चुर् (१०उ.प.)आ.प. | चोरयते | अचोरयत | चोरयताम् | चोरयेत | चोरयिष्यते | चोर्यते |
| | | | | | | |
| अस् (२ प.प.) | अस्ति | आसीत् | अस्तु | स्यात् | भविष्यति | भूयते |
| शक् (५ प.प.) | शक्नोति | अशक्नोत् | शक्नोतु | शक्नुयात् | शक्ष्यति | शक्यते |
| श्रु (५ प.प.) | शृणोति | अशृणोत् | शृणोतु | शृणुयात् | श्रोष्यति | श्रूयते |
| कृ (८ उ.प.) प.प. | करोति | अकरोत् | करोतु | कुर्यात् | करिष्यति | क्रियते |
| कृ (८ उ.प.) आ.प. | कुरुते | अकुर्वत | कुरुताम् | कुर्वीत | करिष्यते | क्रियते |
| ज्ञा (९ उ.प.) प.प. | जानाति | अजानात् | जानातु | जानीयात् | ज्ञास्यति | ज्ञायते |
| ज्ञा (९ उ.प.) आ.प. | जानीते | अजानीत | जानीताम् | जानीत | ज्ञास्यते | ज्ञायते |

## इ) भूतकालवाचक–धातुसाधित–विशेषणानि।

अयं 'कृ' धातोः जलाशयः।
अत्र कति मत्स्याः परिचिताः युष्माकम्?




क्त–भाण्डम्







क्तवतु भाण्डम्

रामेण पाठः पठितः।
रामेण कविता पठिता।
रामेण काव्यं पठितम्।
रामेण पाठाः पठिताः।
सीतया कविते पठिते।
अस्माभिः काव्यानि पठितानि।

यथा कर्मपदं परिवर्तते,
तथा क्रियासूचकं विशेषणम् अपि परिवर्तते।

एतद् क्रियापदात् भिन्नम्।

रामः पाठं पठितवान्।
सीता पाठं पठितवती।
छात्राः पाठं पठितवन्तः।
महिलाः पाठं पठितवत्यः।
अहं पाठं पठितवान्।
त्वं पाठं पठितवती।

यथा कर्तृपदं परिवर्तते,
तथा क्रियासूचकं विशेषणम् अपि परिवर्तते।

'पठित' इति 'क्त' प्रत्ययान्तरूपम् (कर्मवाच्यं भूत. धातु. विशेषणम् = मूलधातुः + त) तथा च 'पठितवत्' इति 'क्तवतु' प्रत्ययान्तरूपम् (कर्तृवाच्यं भूत. धातु. विशेषणम् = मूलधातुः + तवत्)।

| धातुः | क्त रूपम् | क्तवतु रूपम् | धातुः | क्त रूपम् | क्तवतु रूपम् | धातुः | क्त रूपम् | क्तवतु रूपम् |
|---|---|---|---|---|---|---|---|---|
| क्षिप् | क्षिप्त | क्षिप्तवत् | पा | पीत | पीतवत् | पूज् | पूजित | पूजितवत् |
| आप् | आप्त | आप्तवत् | पा | पात | पातवत् | भक्ष् | भक्षित | भक्षितवत् |
| जि | जित | जितवत् | धा | हित | हितवत् | भूष् | भूषित | भूषितवत् |
| नी | नीत | नीतवत् | गै | गीत | गीतवत् | अर्थ् | अर्थित | अर्थितवत् |
| श्रु | श्रुत | श्रुतवत् | ध्यै | ध्यात | ध्यातवत् | क्षल् | क्षालित | क्षालितवत् |
| कृ | कृत | कृतवत् | कथ् | कथित | कथितवत् | तड् | ताडित | ताडितवत् |
| स्मृ | स्मृत | स्मृतवत् | दण्ड् | दण्डित | दण्डितवत् | घुष् | घोषित | घोषितवत् |
| हृ | हृत | हृतवत् | गण् | गणित | गणितवत् | चुर् | चोरित | चोरितवत् |

| धातुः | क्त रूपम् | क्तवतु रूपम् | धातुः | क्त रूपम् | क्तवतु रूपम् | धातुः | क्त रूपम् | क्तवतु रूपम् |
|---|---|---|---|---|---|---|---|---|
| दृश् | दृष्ट | दृष्टवत् | पठ् | पठित | पठितवत् | मन् | मत | मतवत् |
| दिश् | दिष्ट | दिष्टवत् | लिख् | लिखित | लिखितवत् | तन् | तत | ततवत् |
| स्पृश् | स्पृष्ट | स्पृष्टवत् | वन्द् | वन्दित | वन्दितवत् | हन् | हत | हतवत् |
| सृज् | सृष्ट | सृष्टवत् | मुच् | मुक्त | मुक्तवत् | रम् | रत | रतवत् |
| दंश् | दष्ट | दष्टवत् | त्यज् | त्यक्त | त्यक्तवत् | गम् | गत | गतवत् |
| इष् | इष्ट | इष्टवत् | भुज् | भुक्त | भुक्तवत् | वच् | उक्त | उक्तवत् |
| प्रच्छ् | पृष्ट | पृष्टवत् | बुध् | बुद्ध | बुद्धवत् | वद् | उदित | उदितवत् |
| नश् | नष्ट | नष्टवत् | रभ् | रब्ध | रब्धवत् | वह् | ऊढ | ऊढवत् |
| ग्रन्थ् | ग्रथित | ग्रथितवत् | लभ् | लब्ध | लब्धवत् | ग्रह् | गृहीत | गृहीतवत् |
| मन्थ् | मथित | मथितवत् | लुभ् | लुब्ध | लुब्धवत् | यज् | इष्ट | इष्टवत् |

**रूपाणि अवलोकयत।**

| कर्मवाच्यं भूत. धातु. विशेषणम् | | | | कर्तृवाच्यं भूत. धातु. विशेषणम् | | | |
|---|---|---|---|---|---|---|---|
| पठितः | पठितौ | पठिताः | (पुं.) | पठितवान् | पठितवन्तौ | पठितवन्तः | (पुं.) |
| पठिता | पठिते | पठिताः | (स्त्री.) | पठितवती | पठितवत्यौ | पठितवत्यः | (स्त्री) |
| पठितम् | पठिते | पठितानि | (नपुं.) | पठितवत् | पठितवती | पठितवन्ति | (नपुं.) |
| एतानि रूपाणि देव, माला, वन इव। | | | | एतानि रूपाणि भवत्, नदी, जगत् इव। | | | |

**अधोदत्तानि वाक्यानि पठत, भेदम् अवगच्छत।**

| केन/कया कृतम्। | कः कृतवान् / का कृतवती ? |
|---|---|
| १. अर्चकेन देवः पूजितः। | १. अर्चकः देवं पूजितवान्। |
| २. अर्चकेन देवी पूजिता। | २. अर्चकः देवीं पूजितवान्। |
| ३. अर्चकेन दैवतं पूजितम्। | ३. अर्चकः दैवतं पूजितवान्। |
| ४. पितामह्या कथा कथिता। | ४. पितामही कथां कथितवती। |
| ५. चालकेन रूप्यकाणि गणितानि। | ५. चालकः रूप्यकाणि गणितवान्। |
| ६. कृषीवलेन सस्यानि उप्तानि। | ६. कृषीवलः सस्यानि उप्तवान्। |

**जिज्ञासापत्रम्**



**१. 'क्त' प्रत्ययान्तरूपैः रिक्तस्थानानि पूरयत।**

१. जनैः पूजा ______। (कृ)  २.शिक्षकेण पाठः उच्चैः ______। (पठ्)

३. शिष्येण दक्षिणा ______। (दा)  ४. अनया कथा ______। (रच्)

५. बिडालेन क्षीरं ______। (पा)  ६. मया चित्रं ______। (दृश्)

**२. 'क्तवतु' प्रत्ययान्तरूपैः रिक्तस्थानानि पूरयत।**

१. पुरुषः कार्यं ______। (कृ)  २.महिला शाटिकां ______। (धृ)

३. देवाः भक्तान् ______। (रक्ष्)  ४. अहं चित्राणि ______। (दृश्)

५. कविः कवितां ______। (लिख्)

## कण्ठस्थीकरणार्थम् ।

राजा – राजा राट् पार्थिवः क्ष्माभृन्नृपभूपमहीक्षितः ।
गुरुः – उपाध्यायोऽध्यापकोऽथ स्यान्निषेकादिकृद्गुरुः ।
नासिका – क्लीबे घ्राणं गन्धवहा घोणा नासा च नासिका ।
नेत्रम् – लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी ।
कर्णः – कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः ।
षट्पदः–द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः ।
मानवाः – मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ।
दैवम् – दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः ।
निपुणः – प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः ।
यज्ञः – यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः ।
कुबेरः – कुबेरस्त्र्यम्बकसखो राजराजो धनाधिपः ।
याचकः – वनीयको याचनको मार्गणो याचकार्थिनौ ।
मार्गः – अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः ।
सैनिकः – भटा योधाश्च योद्धारः सेनारक्षास्तु सैनिकाः ।
निद्रा – स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि ।
बुद्धिः – बुद्धिर्मनीषा धिषणाधीः प्रज्ञा शेमुषी मतिः ।
हर्षः – मुद् प्रीतिः प्रमदो हर्षः प्रमोदामोदसम्मदाः ।
वचः – व्याहार उक्तिर्लपितं भाषितं वचनं वचः ।
शत्रुः – रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः ।
कुक्कुरः – कौलेयकः सारमेयः कुक्कुरो मृगदंशकः ।
कृपणः – कदर्ये कृपणक्षुद्रकिम्पचानमितम्पचाः ।
शोभनम् – सुन्दरं रुचिरं चारु सुषमं साधु शोभनम् ।
मलिनम् – मलीमसं तु मलिनं कच्चरं मलदूषितम् ।
प्रभूतम् – प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु ।
पूर्णम् – समग्रं सकलं पूर्णमखण्डं स्यादनूनके ।
पुत्रः – आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी ।
यमः – कृतान्तो यमुनाभ्राता शमनो यमराड् यमः ।
दिनः – घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ ।
राक्षसः–राक्षसः कौणपः क्रव्यात् क्रव्यादोऽस्रप आशरः।
शङ्करः – शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः ।
मेघः – अभ्रं मेघो वारिवाहस्तडित्वान् वारिदोऽम्बुभृत्।
मीनः – पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः ।
नभः – नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम् ।
महिला – स्त्री योषिदङ्गना योषा नारी सीमन्तिनी वधूः ।
जगत् – त्रिष्वथो जगती लोको विष्टपं भुवनं जगत् ।
वर्ष – संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः ।
शुभम् – श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ।

## विग्रहः ।

राजा, राट्, पार्थिवः, क्ष्माभृत्, नृपः, भूपः, महीक्षित् ।
उपाध्यायः, अध्यापकः, निषेकादिकृत्, गुरुः ।
घ्राणम्, गन्धवहा, घोणा, नासा, नासिका।
लोचनम्, नयनम्, नेत्रम्, ईक्षणम्, चक्षुः, अक्षिः ।
कर्णः, शब्दग्रहः, श्रोत्रम्, श्रुतिः, श्रवणम्, श्रवः ।
द्विरेफः, पुष्पलिट्, भृङ्गः, षट्पदः, भ्रमरः, अलिः ।
मनुष्याः, मानुषाः, मर्त्याः, मनुजाः, मानवाः, नराः ।
दैवम्, दिष्टम्, भागधेयम्, भाग्यम्, नियतिः, विधिः ।
प्रवीणः, निपुणः, अभिज्ञः, विज्ञः, निष्णातः, शिक्षितः ।
यज्ञः, सवः, अध्वरः, यागः, सप्ततन्तुः, मखः, क्रतुः ।
कुबेरः, त्र्यम्बकसखः, राजराजः, धनाधिपः ।
वनीयकः, याचनकः, मार्गणः, याचकः, अर्थी ।
अयनम्, वर्त्म, मार्गः, अध्वा, पन्थाः, पदवी सृतिः ।
भटाः, योधाः, योद्धारः, सेनारक्षाः, सैनिकाः ।
निद्रा, शयनम्, स्वापः, स्वप्नः, संवेशः ।
बुद्धिः, मनीषा, धिषणा, धीः, प्रज्ञा, शेमुषी, मतिः ।
मुद्, प्रीतिः, प्रमदः, हर्षः, प्रमोदः, आमोदः, सम्मदः ।
व्याहारः, उक्तिः, लपितम्, भाषितम्, वचनम्, वचः ।
रिपुः, वैरी, सपत्नः, अरिः, द्विषद्, द्वेषणः, दुर्हृद् ।
कौलेयकः, सारमेयः, कुक्कुरः, मृगदंशकः ।
कदर्यः, कृपणः, क्षुद्रः, किम्पचानः, मितम्पचः ।
सुन्दरम्, रुचिरम्, चारु, सुषमम्, साधु, शोभनम् ।
मलीमसम्, मलिनम्, कच्चरम्, मलदूषितम् ।
प्रभूतम्, प्रचुरम्, प्राज्यम्, अदभ्रम्, बहुलम्, बहु ।
समग्रम्, सकलम्, पूर्णम्, अखण्डम्, अनूनकम् ।
आत्मजः, तनयः, सूनुः, सुतः, पुत्रः ।
कृतान्तः, यमुनाभ्राता, शमनः, यमराट्, यमः ।
घस्रः, दिनम्, अहः, दिवसः, वासरः ।
राक्षसः, कौणपः, क्रव्यात्, क्रव्यादः, अस्रपः, आशरः।
शम्भुः, ईशः, पशुपतिः, शिवः, शूली, महेश्वरः ।
अभ्रम्, मेघः, वारिवाहः, तडित्वान्, वारिदः, अम्बुभृत्।
पृथुरोमा, झषः, मत्स्यः, मीनः, वैसारिणः, अण्डजः ।
नभः, अन्तरिक्षम्, गगनम्, अनन्तम्, सुरवर्त्म, खम् ।
स्त्री, योषित्, अङ्गना, योषा, नारी, सीमन्तिनी, वधूः ।
जगती, लोकः, विष्टपम्, भुवनम्, जगत् ।
संवत्सरः, वत्सरः, अब्दः, हायनः, शरद्, समाः ।
श्वःश्रेयसम्, शिवम्, भद्रम्, कल्याणम्, मङ्गलम्, शुभम्।

## शब्दकोषः। (पाठानुसारम्)

### १. सुष्ठु गृहीतः चौरः।

१) धनस्यूतः (पुं.) –
२) मायायष्टिका (स्त्री) –
३) अङ्गुलिमात्रम् (नपुं) –

### २. अव्ययमाला।

१) अल्पाक्षरत्वम् (नपुं.) –
२) आस्यम् (नपुं.) –
३) घ्राणम् (नपुं.) –
४) सृष्टम् (विशे.नपुं.) –
५) षट्पदः (पुं.) –
६) केतकीगन्धः (पुं.) –
७) आघ्रातुम् (अव्यय) –
८) परसन्तापः (पुं.) –
९) वर्त्मन् (नपुं.) –
१०) द्वितीया (स्त्री) –
११) स्थानभ्रष्टः (पुं.) –
१२) अनुद्यमः (पुं.) –
१३) आहृत्य (अ.) –

### ३. धन्यौ तौ दातृयाचकौ।

१) प्रकृत्या (स्त्री) –
२) पटुः (पुं.) –
३) भृशम् (अ.) –
४) स्वस्ति (अ.) –
५) सकाशात् (अ.)–
६) परावर्तितुम् (अ.) –
७) आक्रान्तुम् (अ.) –
८) प्रभूता (स्त्री) –

### ४. विध्यर्थमाला।

१) चेत् (अव्यय) –
२) कुतः (अव्यय) –
३) अनृतम् (अव्यय) –
४) काङ्क्षेत (क्रि.) –
५) सम्यक् (अ.) –
६) प्रत्यहम् (अ.) –
७) वृकः (पुं.) –
८) अवलुम्पेत (क्रि.) –

### ५. किं मिथ्या? किं वास्तवम्?

१) मन्थनम् (नपुं.) –
२) सुखासन्दः (पुं.)–
३) चलभाषः (पुं.) –
४) द्वारघण्टिका (स्त्री) –
५) यष्टिकन्दुकक्रीडा (पुं.) –
६) लालायितम् (विशे.) –
७) बुभुक्षा (स्त्री) –
८) आभासात्मकम् (नपुं.) –

### ६. वीरवनिता विश्पला।

१) भुवम् (स्त्री) –
२) युगपद् (अ.) –
३) प्रत्युत (अ.) –
४) इतःपरम् (अ.) –
५) आयुधप्रहारः (पुं.) –
६) कदलीवृक्षः (पुं.) –
७) संहृतः (विशे.) –

### ७. योगमाला।

१) उत्तानम् (नपुं.) –
२) जानु (नपुं.) –
३) व्योमस्थम् (पुं.)–
४) पाणिः (पुं.) –
५) प्रजल्पः (पुं.) –
६) अन्तरायः (पुं.) –

### ८. पिन्कोड्-प्रवर्तकः महान् संस्कृतज्ञः।

१) आङ्ग्लभाषा (स्त्री) –
२) दुर्बोधम् (नपुं.) –
३) प्रत्यूहाः (पुं.) –
४) विद्वद्वरेण्यः (पुं.) –

### ९. सूक्तिसुधा।

१) भ्रातृभाज्यम् (नपुं.) –
२) गणना (स्त्री) –
३) दुहन्ति (धातुरूप) –
४) जाड्यम् (विशे.) –
५) हन्त – (अ.) –
६) विग्रहे – (पुं.) –
७) परः (पुं.) –
८) व्यसनिन् (पुं.) –

### १०. पितृभक्तः नचिकेताः।

१) लालितः (पुं.) –
२) क्रोधावेशः (पुं.) –
३) निवारयितुम् (अ.) –

### ११. मनसः स्वच्छता।

१) हठम् (नपुं.) –
२) उत (अ.)–
३) लघुभारम् (नपुं.) –
४) आर्द्रः (पुं.) –
५) शाटिकाञ्चलम् (नपुं.) –
६) कियन्तः (अ.) –
७) रजकः (पुं.) –
८) चन्दनफेनकम् (नपुं.) –
९) व्यापृतम् (अ.) –

### १२. अमरकोषः।

१) अध्येतृ (पुं.) –
२) यथेष्टम् (अ.) –
३) आचन्द्रतारकम् (नपुं.) –
४) अनुशासनम् (नपुं.) –
५) विनायासम् (अ.) –

### १३. सरमायाः शीलम्।

१) उपहारः (पुं.) –
२) किङ्करः (पुं.) –
३) मघवान् (पुं.) –
४) तटरुहतरुः (पुं.) –
५) जलौघः (पुं.) –
६) पृथुलरभसा (स्त्री) –
७) विनयवचसा (स्त्री) –
८) म्लानमुखी (स्त्री) –
९) परतीरम् (नपुं.) –
१०) वलः (पुं.) –
११) जारु (नपुं.) –

### १४. काव्यशास्त्रविनोदः।

१) मस्तिष्कखाद्यम् (नपुं.) –
२) सरसम् (नपुं.) –
३) पक्षिराजः (पुं.) –
४) शूलपाणिः (पुं.) –
५) बिभ्रत् (विशे.) –
६) लुब्धकः (पुं.) –
७) धीवरः (पुं.) –
८) पिशुनः (पुं.) –
९) चञ्चलतरः (पुं.) –
१०) वक्त्रम् (नपुं.) –
११) चाटून् (अ.) –
१२) मृषा (अ.) –
१३) प्रत्याशा (स्त्री.)
१४) बालतृणम् (नपुं.) –
१५) मुहुः (अ.) –
१६) कुरङ्गः (पुं.) –

| | | |
|---|---|---|
| **१५. मनोराज्यस्य फलम्।** | ९) चतुःशालम् (नपुं.) – | ३) अधिगन्तुम् (अ.) – |
| १) अधीते (क्रि.) – | १०) प्राप्तवयस्का (स्त्री.) – | ४) अतिप्रदीप्तप्रज्ञामेधे (स्त्री) – |
| २) शक्रः (पुं.) – | ११) जानुचलनयोग्यः (पुं.) – | ५) अस्मादृशः (पुं.) – |
| ३) सक्तुः (पुं.) – | १२) श्रोष्यति (क्रि.) – | ६) जडः (पुं.) – |
| ४) नागदन्तः (पुं.) – | १३) पाण्डुरता (स्त्री.) – | ७) मृदा (स्त्री.) – |
| ५) वडवा (स्त्री.) – | १४) शेते (क्रि.) – | ८) आम्नायः (पुं.) – |
| ६) यूथम् (पुं.) – | **१६. स्वागतं तपोधनायाः।** | ९) सवनम् (नपुं.) – |
| ७) महिषी (स्त्री.) – | १) नेपथ्यम् (नपुं.) – | १०) निषादः (पुं.) – |
| ८) विक्रयणम् (नपुं.) – | २) अध्वगवेषा (स्त्री.) – | |

## घटकपरीक्षा १ प्रारूपम् — अङ्काः २०

(पाठ १, २, ३, भाषासूत्रम् १)

**प्र. १. अ) १) चित्रं दृष्ट्वा नामानि लिखत (३ तः २)** १

**२) सङ्ख्याः अक्षरैः /अङ्कैः लिखत (३ तः २)** १

**प्र. १. आ) गद्यांशं पठित्वा कृतीः कुरुत। (२ गद्यांशौ) ।** ८

१) एकवाक्येन उत्तरत। (१)

२) सत्यम् असत्यं वा/उचितं कारणं/ कः कं वदति ? (१)

३) गद्यांशात् समानार्थकं/विरुद्धार्थकं शब्दं चिनुत। (१)

४) द्वे त्वान्त/ल्यबन्त/तुमन्त-अव्ययपदे/विभक्त्यन्तपदे चिनुत। (१)

**प्र. २ अ)पद्यांशं पठित्वा कृतीः कुरुत।** ३

१. पद्यांशः-१ कस्यापि एकस्य श्लोकस्य अनुवादं माध्यमभाषया लिखत।(२ तः १) (२)

२. पद्यांशः-२ एकवाक्येन उत्तरत। (१) अथवा २ समानार्थकौ/विरुद्धार्थकौ शब्दौ चिनुत।(१)

**आ) श्लोकं पूर्णं शुद्धं च लिखत। (२ तः १)** २

**प्र. ३. व्याकरणम्।** ५

**अ) तालिकां पूरयत। (३ तः २)** (नाम-सर्वनाम-क्रियापदतालिका) (२)

**आ) अव्ययानां/धातूनाम् उपयोगं कृत्वा वाक्यानि लिखत। (३ तः २)** (२)

**इ) वाक्यं शुद्धं कुरुत। (२ तः १)** (१)

* * *

# परिशिष्टम् – १

## पदाभ्यासः ।

### नाम–तालिकां पूरयत ।

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| नीलकण्ठाय | | | चतुर्थी |
| | सरस्वत्योः | | षष्ठी |
| | | नक्षत्राणि | द्वितीया |

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| | वस्तुभ्याम् | | तृतीया |
| पितरि | | | सप्तमी |
| | | धेनुभ्यः | पञ्चमी |

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| | | चन्द्रमस्सु | सप्तमी |
| विद्युते | | | चतुर्थी |
| | पयसी | | प्रथमा |

### सर्वनामतालिकां पूरयत ।

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| तस्मात् | | | पञ्चमी |
| | | अस्माभिः | तृतीया |
| | कयोः | केषु | सप्तमी |

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| तव, ते | | | षष्ठी |
| | आभ्याम् | | चतुर्थी |
| | | भवतः | द्वितीया |

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| अस्याम् | | | सप्तमी |
| | | भवतीभ्यः | चतुर्थी |
| | इमे | इमानि | प्रथमा |

**लकार–तालिकां पूरयत ।**

| लट् | एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|---|
| | वन्दते | | | प्रथमपुरुष: |
| | | नृत्यावहे | | उत्तमपुरुष: |
| | | | कथयथ | मध्यमपुरुष: |

| लङ् | एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|---|
| | | | अपठाम् | उत्तमपुरुष: |
| | | आस्ताम् | | प्रथमपुरुष: |
| | | | अलभध्वम् | मध्यमपुरुष: |

| लोट् | एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|---|
| | करोतु | | | प्रथमपुरुष: |
| | | पूजयतम् | | मध्यमपुरुष: |
| | | | गच्छाम | उत्तमपुरुष: |

| लिङ् | एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|---|
| | | रक्षेतम् | | मध्यमपुरुष: |
| | | | विद्येमहि | उत्तमपुरुष: |
| | भवेत् | | | प्रथमपुरुष: |

| लृट् | एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|---|
| | क्षालयिष्यति | | | प्रथमपुरुष: |
| | | वर्धिष्येथे | | मध्यमपुरुष: |
| | | | कोपिष्याम: | उत्तमपुरुष: |

**रूपाणि परिचिनुत ।**

| अ.क्र. | नामरूपम् | प्रातिपदिकम् | अन्त: | लिङ्गम् | विभक्ति: | वचनम् |
|---|---|---|---|---|---|---|
| १ | भानो: | | | | | |
| २ | भ्रातुषु | | | | | |
| ३ | अस्या: | | | | | |

| अ.क्र. | | धातु: | गण:/पदं | काल: | पुरुष: | वचनम् |
|---|---|---|---|---|---|---|
| १ | प्राप्स्यामि | | | | | |
| २ | अहरत् | | | | | |
| ३ | पूज्यते | | | | | |
| ४ | चोरयतु | | | | | |

# परिशिष्टम् – २

## सन्धिकोषः ।

### १. सुष्ठु गृहीतः चौरः ।

१. कोऽपि – कः + अपि ।
२. पूर्वमेव – पूर्वम् + एव ।
३. पुनरागन्तव्यम् – पुनः + आगन्तव्यम् ।
४. केनापि – केन + अपि ।
५. दृष्ट्वैव – दृष्ट्वा + एव ।

### २.अव्ययमाला ।

१. वक्तुमास्यं – वक्तुम् + आस्यम् ।
२. दूरेऽपि – दूरे + अपि ।
३. केतकीगन्धमाघ्राय –
केतकीगन्धम् + आघ्राय ।
४. स्वयमायान्ति – स्वयम् + आयान्ति ।
५. लोकेभ्यो धेनवो – लोकेभ्यः +धेनवः ।
६. यत्स्वल्पमपि – यत् + स्वल्पम् + अपि ।
७. स्यामहं – स्याम् + अहम् ।
८. प्रारब्धमुत्तमजनाः – प्रारब्धम् + उत्तमजनाः ।
९. पुनरपि – पुनः + अपि ।

### ३. धन्यौ तौ दातृयाचकौ ।

१. कस्मिंश्चित् – कस्मिन् + चित् ।
२. दातुमुत्सुकः – दातुम् + उत्सुकः ।
३. प्रीतोऽस्मि – प्रीतः + अस्मि ।
४. कामपि – काम् + अपि ।
५. नेच्छामि – न + इच्छामि ।
६. दातुमिच्छामि – दातुम् + इच्छामि ।
७. कुबेरमाक्रान्तुम् – कुबेरम् + आक्रमितुम् ।
८. सुवर्णवृष्टिमकरोत् –
सुवर्णवृष्टिम् + अकरोत् ।
९. दातुमैच्छत् – दातुम् + ऐच्छत् ।
१०. अधिकमादातुम् – अधिकम् + आदातुम् ।
११. द्वावपि – द्वौ + अपि ।
१२. प्रसिद्धमेव – प्रसिद्धम् + एव ।
१३. स एव – सः + एव ।
१४. कश्चित् – कः + चित् ।

### ४. विध्यर्थमाला ।

१. त्यजेद्विद्यां – त्यजेत् + विद्याम् ।
२. त्यजेत्सुखम् – त्यजेत् + सुखम् ।
३. कुतो विद्या – कुतः + विद्या ।
४. कुतो विद्यार्थिनः – कुतः + विद्यार्थिनः ।
५. धनमलब्धं – धनम् + अलब्धम् ।
६. चानृतम् – च + अनृतम् ।
७. शत्रुभ्यामिव – शत्रुभ्याम् + इव ।
८. नार्पयेत् – न + अर्पयेत् ।
९. नरश्चरितमात्मनः –
नरः + चरितम् + आत्मनः ।
१०. किन्नु – किम् + नु ।
११. पशुभिस्तुल्यं – पशुभिः + तुल्यम् ।
१२. सत्पुरुषैरिति – सत्पुरुषैः + इति ।
१३. बकवच्चिन्तयेदर्थान् –
बकवत् + चिन्तयेत् + अर्थान् ।
१४. सिंहवच्च – सिंहवत् + च ।
१५. वृकवच्चावलुम्पेत –
वृकवत् + च + अलुम्पेत ।
१६. शशवच्च – शशवत् + च ।

### ५. किं मिथ्या ? किं वास्तवम् ?

१. सत्यमेव – सत्यम् + एव ।
२. तथापि – तथा + अपि ।
३. अत्याधिकोऽपयोगः –
अत्याधिकः + उपयोगः ।
४. इयमेवावश्यकता –
इयम् + एव + आवश्यकता ।
५. किमपि – किम् + अपि ।

### ६. वीरवनिता विश्पला ।

१. तथैव – तथा + एव ।
२. यद्यपि – यदि + अपि ।
३. पादकर्तनानन्तरमपि –
पादकर्तनानन्तरम् + अपि ।

### ७. योगमाला ।

१. पूर्वमुच्यते – पूर्वम् + उच्यते ।
२. कुर्यात्तदासनं – कुर्यात् + तत् + आसनम् ।
३. स्थैर्यमारोग्यं – स्थैर्यम् + आरोग्यम् ।
४. चाङ्गलाघवम् – च + अङ्गलाघवम् ।
५. नासाग्रमालोकयेद् – नासाग्रम् + आलोकयेत् ।
६. धनुरासनमुच्यते – धनुरासनम् + उच्यते ।
७. वसेदिदं – वसेत् + इदम् ।

८. पश्चिमतानमाहु: – पश्चिमतानम् + आहु: ।
९. जानोर्महिर्वेष्टितवामपादम् –
जानो: + बहि: + वेष्टितवामपादम् ।
१०. श्रीमस्त्यनाथोदितमासनं –
श्रीमस्त्यनाथोदितम् + आसनम् ।
११. तच्छवासनम् – तत् + शवासनम् ।
१२. प्रयासश्च – प्रयास: + च ।
१३. जनसङ्घश्च – जनसङ्घ: + च ।
१४. षड्भिर्योगो – षड्भि: + योग: ।

## ८. पिनकोड–प्रवर्तक: महान् संस्कृतज्ञ: ।

१. इतोऽपि – इत: + अपि ।
२. इत्येव – इति + एव ।
३. किञ्चिदपि – किञ्चित् + अपि ।
४. मासाधिकोऽपि – मासाधिक: + अपि ।
५. अधुनापि – अधुना + अपि ।
६. सङ्गीतमपि – सङ्गीतम् + अपि ।
७. तबलावादनेऽपि – तबलावादने + अपि ।
८. सर्वमेव – सर्वम् + एव ।

## ९. सूक्तिसुधा ।

१. वसुधैव – वसुधा + एव ।
२. परोपकारार्थमिदम् –
परोपकारार्थम् + इदम् ।
३. पापमपाकरोति – पापम् + अपाकरोति ।
४. नार्यस्तु – नार्य: + तु ।
५. यत्रैतास्तु – यत्र + एता: + तु ।
६. सर्वास्तत्राफला: –
सर्वा: + तत्र + अफला: ।
७. चातकस्त्रिचतुरान् – चातक: + त्रिचतुरान् ।
८. सोऽपि – स: + अपि ।
९. विश्वमम्भसा – विश्वम् + अम्भसा ।
१०. महतामुदारता – महताम् + उदारता ।
११. परैस्तु – परै: + तु ।
१२. पाठकश्चैव – पाठक: + च + एव ।
१३. चान्ये – च + अन्ये ।
१४. क्रियावान्स: – क्रियावान् + स: ।
१५. वर्धत एव = वर्धते + एव ।
१६. धियो हरति = धिय: + हरति ।

## १०. पितृभक्त: नचिकेता: ।

१. त्समास – त्वम् + एव ।
२. तदेव – तत् + एव ।
३. तत्रैव – तत्र + एव ।
४. कथमिव – कथम् + इव ।
५. ज्ञानिनामपि – ज्ञानिनाम् + अपि ।

## ११. मनस: स्वच्छता ।

१. बाल्यादेव – बाल्यात् + एव ।
२. लघुभारमिव – लघुभारम् + इव ।
३. प्रतिदिनमिव – प्रतिदिनम् + इव ।
४. इत्यपि – इति + अपि ।

## १२. अमरकोष: ।

१. कवेरमरसिंहस्य – कवे: + अमरसिंहस्य ।
२. कृतिरेषा – कृति: + एषा ।
३. वयमपि – वयम् + अपि ।
४. तदपि – तत् + अपि ।
५. कर्तव्यमेव – कर्तव्यम् + एव ।

## १३. सरमाया: शीलम् ।

१. स्वदेशमपाहरन् – स्वदेशम् + अपाहरन् ।
२. किङ्करो नैकोऽपि –
किङ्कर: + नैक: + अपि ।
३. यो भवेत् – य: + भवेत् ।
४. अतस्ताम् – अत: + ताम् ।
५. याचेऽहम् – याचे + अहम् ।
६. तवेदम् – तव + इदम् ।
७. पणिभिर्यद् – पणिभि: + यद् ।
८. समाप्तमन्वेषणकार्यम् –
समाप्तम् + अन्वेषणकार्यम् ।
९. नाहम् – न + अहम् ।
१०. तन्न – तत् + न ।
११. गमनमारभे – गमनम् + आरभे ।
१२. किञ्चित् – किम् + चित् ।

## १४. काव्यशास्त्रविनोद: ।

१. विपरीताश्चेद् – विपरीता: + चेत् ।
२. विपरीतोऽपि – विपरीत: + अपि ।
३. बिभ्रन्न – बिभ्रत् + न ।
४. ममाज्ञया – मम + आज्ञया ।
५. पितुराज्ञा – पितु: + आज्ञा ।
६. तस्यादिर्न – तस्य + आदि: + न ।
७. तस्यान्त: – तस्य + अन्त: ।
८. तवाप्यस्ति – तव + अपि + अस्ति ।
९. ममाप्यास्ति – मम + अपि + अस्ति ।

१०. गङ्गायाश्चञ्चलतरे – गङ्गाया: + चञ्चलतरे।
११. तन्मे – तत् + मे ।

## १५. मनोराज्यस्य फलम् ।

१. शास्त्रविमुखाश्च – शास्त्रविमुखा: + च ।
२. य इदम् – य: + इदम् ।
३. पराभवमाप्नोति – पराभवम् + आप्नोति।
४. शक्रादपि – शक्रात् + अपि ।
५. स्वभावकृपणो नाम – स्वभावकृपण: + नाम ।
६. तस्याधस्तात् – तस्य + अधस्तात् ।
७. यत्परिपूर्णोऽयम् – यत् + परिपूर्ण: + अयम् ।
८. घटस्तावत् – घट: + तावत् ।
९. ततस्तेन – तत: + तेन ।
१०. ततोऽजाभि: – तत: + अजाभि: ।
११. विक्रयणात्प्रभूतम् – विक्रयणात् + प्रभूतम् ।
१२. तस्याहम् – तस्य + अहम् ।
१३. सोमशर्मेति – सोमशर्मा + इति ।
१४. ततोऽहम् – तत: + अहम् ।
१५. चिन्तामसम्भाव्याम् – चिन्ताम् + असम्भाव्याम्।
१६. साऽपि – सा + अपि ।

## १६. स्वागतं तपोधनाया: ।

१. राज्याभिषेकादनन्तरम् – राज्याभिषेकात् + अनन्तरम् ।
२. आगतास्मि – आगता + अस्मि ।
३. दारकद्वयमुपनीतम् – दारकद्वयम् + उपनीतम् ।
४. त्रयीविद्यामपि – त्रयीविद्याम् + अपि ।
५. यथैव – यथा + एव ।
६. तयोर्ज्ञाने – तयो: + ज्ञाने ।
७. करोत्यपहन्ति – करोति + अपहन्ति ।
८. पुनर्भूयान् – पुन: + भूयान् ।
९. तद्यथा – तद् + यथा ।
१०. शुचिर्बिम्बग्राहे – शुचि: + बिम्बग्राहे ।
११. मणिर्न – मणि: + न ।
१२. अन्यश्च – अन्य: + च ।
१३. अथैकदा – अथ + एकदा ।
१४. अध्ययनमसम्भवम् – अध्ययनम् + असम्भवम्।
१५. विश्रान्तास्मि – विश्रान्ता + अस्मि ।
१६. अयमध्ययनप्रत्यूह: – अयम् + अध्ययनप्रत्यूह:।
१७. त्वमगम: – त्वम् + अगम: ।

## परिशिष्टम् – ३

## अपठित-गद्यम् ।

(१) तरुषु निवसन्ति विहगा: । प्रभाते ते आकाशे उत्पतन्ति । दिशायां दिशायां परिभ्रमन्ति दिनावसाने च स्वनीडं प्रत्यागच्छन्ति । विहगा: धान्यकणान् आनयन्ति प्रयच्छन्ति च स्वशावकेभ्य: । वनमधितिष्ठन्ति कुरङ्गा। ते वने विचरन्ति कोमलानि तृणानि खादन्ति च । ततश्च यत्र कुत्रापि समुपविशन्ति रोमन्थं च कुर्वन्ति। दीर्घाणि शृङ्गाणि मस्तकेषु उद्वहन्ति केचित् मृगा: ।

अ) समानार्थकशब्दं लिखत ।

१) विहग: = २) वनम् =

आ) एकवाक्येन उत्तरत ।

१) विहगा: कुत्र निवसन्ति ?

२) मृगा: मस्तकेषु कानि उद्वहन्ति ?

इ) सन्धिविग्रहं कुरुत ।

१) ततश्च = ______ + ______ ।

(२) गङ्गाया: पवित्रेण जलेन कृषीवलानां महोपकार: भवति । ते स्वक्षेत्रेषु पर्याप्तं धान्यं लभन्ते। इत्थं तत्र समृद्धि: जायते । अस्या: तटे बहूनि समृद्धानि नगराणि सन्ति । तेषां नगराणां समृद्धे: कारणं एषा जाह्नवी एव । परन्तु मानवा: तां मलिनीकुर्वन्ति । अस्या: निर्मलता पवित्रता च अस्माभि: रक्षणीया । यत: नद्य: अस्माकं मातर: इव ।

अ) एकवाक्येन उत्तरत ।

१) जलेन केषां महोपकार: भवति ?

२) नगराणि कीदृशानि ?

| आ) विशेषण | विशेष्यम् |
|---|---|
| १) धान्यं | नगराणि |
| २) समृद्धानि | पर्याप्तम् |
| ३) निर्मलता | जलम् |
| ४) पवित्रम् | रक्षणीया |

(३) 'स्वराज्यं मम जन्मसिद्धोऽधिकार:' इति साभिमानं घोषणां कुर्वन्तं महापुरुषं को नाभिजानाति ? तं महापुरुषं वयं कदापि विस्मर्तुं न शक्नुम: । 'बाल-गङ्गाधर-तिलक:' इति तस्य नाम। कोङ्कणप्रान्ते 'चिखली' इति नाम्नि ग्रामे तस्य जन्म अभवत् । यथा पङ्कजस्य सुगन्ध: सर्वत्र प्रसरति तथा लोकमान्यस्य कीर्तिरपि सर्वत्र प्रासरत् ।

अ) एकवाक्येन उत्तरत ।

१) तिलकमहोदयस्य जन्म कुत्र अभवत् ?

२) तिलकमहोदयस्य घोषणा का ?

अ) समानार्थकशब्दं चिनुत लिखत च ।

कमलम्, अभिधानम् ।

(४) रघुकुलोत्पन्न: रामचन्द्र: सत्यप्रिय: प्रजाहितदक्ष: च राजा इति प्रसिद्ध: । भारतीयास्तम् आदर्शवत् मन्यन्ते । पितु: आज्ञापालनार्थं चतुर्दश वर्षाणि स: वने न्यवसत् । तस्य पत्नी सीता, भ्राता लक्ष्मण: च तेन सह सानन्दं वने अवसताम् । तत्र महापराक्रमी राम: क्षात्रधर्मस्य पालनं कृत्वा बहून् राक्षसान् हतवान्।


अ) सत्यम् असत्यं वा इति लिखत ।

१) रामचन्द्र: प्रजाहितदक्ष: राजा।

२) राम: द्वादश वर्षाणि वने न्यवसत् ।

आ) जालरेखाचित्रं पूरयत ।

रामचन्द्रस्य विशेषणानि



इ) सन्धिविग्रहं कुरुत ।


१) भारतीयास्तम् - _____ + _____ ।

**सूचना – एते परिच्छेदा: छात्राणाम् अभ्यासार्थं दत्ता: । प्रश्नपत्रिकायां न प्रष्टव्या: ।**

# परिशिष्टम् – ४

## अपठित-पद्यम् ।

१) मौनं कालविलम्बश्च प्रयाणं भूमिदर्शनम् ।
भ्रुकुट्यन्यमुखी वार्ता नकार: षड्विध: स्मृत: ।।




२) उपकारोऽपि नीचानाम् अपकारो हि जायते ।
पय:पानं भुजङ्गानां केवलं विषवर्धनम् ।।

एकवाक्येन उत्तरत ।

१) केषां पय:पानं विषवर्धनम् ?

विरुद्धार्थकं शब्दं लिखत ।

१) उपकार: x ______ (२) विषम् x ______

३) चिन्तनीया हि विपदाम् आदावेव प्रतिक्रिया ।
न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे ।।

एकवाक्येन उत्तरत ।


१) विपदां प्रतिक्रिया कदा चिन्तनीया ?

२) यदा गृहं वह्निना प्रदीप्तं तदा किं न युक्तम् ?

समानार्थकं शब्दं लिखत ।

(१) वह्नि: (२) गृहम् (३) विपद् (४) कूप:

४) ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो
ज्ञानस्योपशम: श्रुतस्य विनयो वित्तस्य पात्रे व्यय: ।
अक्रोधस्तपस: क्षमा बलवतां धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ।।




सूचना – एते श्लोका: छात्राणाम् अभ्यासार्थं दत्ता: । प्रश्नपत्रिकायां न प्रष्टव्या: ।



































- पाठ्यपुस्तक मंडळाची वैशिष्ट्यपूर्ण पाठ्येत्तर प्रकाशने.
- नामवंत लेखक, कवी, विचारवंत यांच्या साहित्याचा समावेश.
- शालेय स्तरावर पूरक वाचनासाठी उपयुक्त.

पुस्तक मागणीसाठी www.ebalbharati.in, www.balbharati.in संकेत स्थळावर भेट द्या.

**साहित्य पाठ्यपुस्तक मंडळाच्या विभागीय भांडारांमध्ये विक्रीसाठी उपलब्ध आहे.**

ebalbharati

विभागीय भांडारे संपर्क क्रमांक : पुणे - ☎ २५६५९४६५, कोल्हापूर- ☎ २४६८५७६, मुंबई (गोरेगाव) - ☎ २८७७१८४२, पनवेल - ☎ २७४६२६४६५, नाशिक - ☎ २३९१५११, औरंगाबाद - ☎ २३३२१७१, नागपूर - ☎ २५४७७१६/२५२३०७८, लातूर - ☎ २२०९३०, अमरावती - ☎ २५३०९६५